# संस्कृत-वार्ता:

**दिनाङ्कः-25.08.2024** **सायम् - 06:20**

**मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्र मोदी अद्य आकाशवाण्या: मन की बात कार्यक्रमे अवोचत् यत् अन्तरिक्ष-क्षेत्रे समुन्त्या युवान: लाभान्विता: जाता:।
- श्रीमोदी अवोचत् यत् सम्प्रति युवान: राजनीतौ बृहत्सङ्ख्यायां सक्रिया: जायन्ते।
- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य महाराष्ट्रस्य जलगाव-नगरे आयोजिते कार्यक्रमे एकादशलक्षं नूतनाभ्य: लखपति-दीदी इत्येताभ्य: प्रमाणपत्राणि वितरितानि।
- अखिलभारतीय-रेलगण-सङ्घेन केन्द्र-सर्वकारस्य एकीकृत-पेंशन-योजनायाः स्वागतं कृतम्।
- बैडमिण्टन्-क्रीडायां भारतस्य तन्वी पात्री इत्येषा अद्य एशिया-महाद्वीपीय-कनिष्ठ-च्याम्पियन्शिप्-स्पार्धायाम् एकल-बालिका वर्गे विजयश्रीम् अवाप्नोत्।

******

**मन की बात**

प्रधानमन्त्री नरेन्द्र मोदी अद्य आकाशवाण्या: मन की बात कार्यक्रमे निज-विचारान् प्रकटितवान्। मासिक-रेडियो कार्यक्रमस्य एतत् त्रयोदशोत्तरैक-शत-तमं संस्करणम् अवर्तत्। प्रधानमन्त्री अवोचत् यत् अन्तरिक्ष-क्षेत्रे समुन्त्या युवान: लाभान्विता: जाता:। अमुना उक्तं यत् देशे नैकानि तादृशानि कार्याणि जायन्ते यै: विकसित-भारतस्य आधारशिला सुदृढा भवति। अस्य मासस्य त्रयोविंशे दिने देशवासिभि: प्रथम: राष्ट्रियान्तरिक्ष-दिवस: चन्द्रयान-तृतीयस्य च उत्सव: आमानित:। श्रीमोदी अवोचत् यत् अस्मिन् वर्षे रक्तदुर्गात् विहिताह्वानस्य प्रभाव: अपि जनेषु दृश्यते। सम्प्रति राजनीतौ युवान: बृहत्सङ्ख्यायां सक्रिया: जायन्ते। प्रतिगृहं त्रिवर्णध्व-जाभियानस्य विषये प्रधानमन्त्री अवदत् यत् काश्मीरम् अरूणांचल-प्रदेशं च समेत्य देशस्य प्रत्येकं भागेषु त्रिवर्णध्वज-यात्राया: सुन्दराणि चित्राणि दृष्टिपथम् आगतानि। निज सम्बोधने प्रधानमन्त्रिणा असमस्य तिनसुकिया जनपदस्य बारेकुरी ग्रामस्योल्लेख:, मध्य प्रदेशस्य झबुआ जनपदस्य स्वच्छता कर्मिणां च उल्लेखो विहित:। सद्य एव आमानितस्य विश्वसंस्कृत-दिवसस्य विषये प्रवदन् प्रधानमन्त्री प्रोफेसर वायतिस-विदुनास इत्यस्य चर्चाम् अपि अकरोत्।

पैरिस नगरे आयोक्ष्यमाणानां पैरालम्पिक-क्रीडाणां भारतीय-दलस्य समर्थनाय **हैश टैग चीयर फॉर भारत** इत्यस्याह्वानम् अपि प्रधानमन्त्री अकरोत्। आगामि दिनेषु जन्माष्टमी गणेश-चतुर्थी ओणम मिलाद-उन-नवी अथ तेलुगु भाषा दिवसेभ्य: प्रधानमन्त्रिणा देशवासिभ्य: शुभकामना: प्रदत्ता:।

**प्रधानमन्त्रि-महाराष्ट्रस्य जलगाव-नगर**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य महाराष्ट्रस्य जलगाव-नगरे आयोजिते कार्यक्रमे एकादशलक्षं नूतनाभ्य: लखपति-दीदी इत्येताभ्य: प्रमाणपत्राणि वितरितानि। श्रीमोदी लखपति-दीदीं इत्येतासां कृते पोषयत्, या: सद्यः एव एन्. डी. ए-प्रशासनस्य तृतीये कार्यकाले लखपति-दीदी इति पदम् प्राप्तवत्य:। प्रधानमन्त्रिणा ताभि: सह अपि संवादः कृतः। अवधेयं वर्तते यत् एता: लखपति-दीदी इति प्रतिवर्षं एक-लक्षरूप्यकाधिकं अर्जयन्ति। कार्यक्रमस्य समये, श्रीमोदी पञ्चशताधिक-द्वि-सहस्रकोटिरूप्यकाणां समुदाय-निवेश-कोषम् इति परिक्रमण-निधिं प्राकाशयत्, येन हि त्रि-सहस्राधिक-चतुर्लक्षम् स्वसहायता-समूहानां प्रायः अष्ट-चत्वारिंशल्लक्षम् सदस्याः उपकृताः

भविष्यन्ति। जनसमूहं सम्बोधयन्, प्रधानमन्त्री अवदत् यत्, गतदशवर्षेषु, एककोटि-महिलाः लखपति-दीदीः इति अभवन्, केवलं मासद्वये एव एकादश लक्षम् लखपति-दीदी इति योजिताः।

श्रीमोदी राजस्थानस्य जोधपुरं सम्प्राप्त:। तत्रासौ राजस्थानोच्चन्यायालयस्य पञ्चसप्ततितमस्य समारोहस्य समापनसत्रे मुख्यातिथित्वेन भविष्यति। तत्र राजस्थानोच्चन्यायालयस्य सङ्ग्रहालयस्य उद्घाटनं विधास्यति।

**केन्द्रीयान्वेषणविभाग:-आर.जी.कर**

पश्चिमबङ्गालराज्ये केन्द्रीयान्वेषणविभागेन कोलकाता-नगरे आर.जी. कर -चिकित्सकीय- महाविद्यालयस्य चिकित्सालयस्य प्रशिक्षु-महिलाया: हत्याया: दुष्कर्मण: च प्रसङ्गे चिकित्सालयस्य वित्तीय-अनियमितताया: आरोपाणां सन्दर्भे अद्य प्रात: पञ्चदश-स्थानानि निरीक्षणानि। विभागस्य एकं दलं चिकित्सकीय-महाविद्यालयस्यास्य पूर्व-प्रधानाचार्ये तस्यावासे परिपृच्छां समाचरति। अपरत्र नियुक्त-प्रधानाचार्येण उप-प्रधानाचार्येण च सह अन्यं एकं विशिष्टदलं परिपृच्छां करोति इति। एतदतिरिच्य विभागस्य अन्यं दलं प्राध्यापकेण देबाशीष-सोमेन पूर्व-चिकित्सालयीय -अधीक्षकेण उपप्रचार्येण च डॉ. सञ्जय वशिष्ठेन सह तेषाम् आवासे प्रश्नपृच्छा कुरुते।

**भारतर्तु विज्ञानविभाग:**

भारतर्तु-विज्ञान-विभागेन पूर्वानुमानित: यत् राजस्थान-मध्यप्रदेश-महाराष्ट्र-गुजरात-सौराष्ट्र-कच्छ-क्षेत्रेषु अद्य महती वृष्टि: भविष्यति। मेघालय-असम-राज्ययो: अपि अतिवृष्टि: सम्भावितास्ति। तत्रैव अद्य उत्तरप्रदेश-कर्णाटक-तेलङ्गाना-विदर्भ-मराठवाड़ा क्षेत्रेस्वपि उच्चस्तरीया वृष्टि: प्रकल्पिता विभागेन।

**मंकी पॉक्स**

महाराष्ट्रे मंकी पॉक्स इति वानर-जनित-सङ्क्रमणं निराकर्तुं राज्यस्य स्वास्थ्यविभाग: पुणे नगरे कार्यम् आचरित। विगतेषु षट् दिनेषु पुणे विमान-पत्तने सिंगापुर दुबई नगराभ्यां समागतानाम् एकत्रिंशदुत्तर पञ्चशतं यात्रिणां परीक्षण कृतम्। तेषु कोऽपि सङ्क्रमित: नैव प्राप्त:।

**टेलीग्रामअनुप्रयोग निर्माता-निगडनम्**

प्रख्यातस्य सन्देशवाहकस्य टेलीग्रामइत्याख्यस्य अनुप्रयोगस्य संस्थापक: प्रमुख-कार्यकारी-अधिकारी च पावेल-ड्यूरोव इत्येष: गते दिने पेरिसनगरस्य ले बॉर्गेट-विमानपत्तनात् निगडित:। फ्रांसदेशीयै: अधिकारिभि: ख्यापितं यत् ड्यूरोव इत्येतस्य निगडनं तस्य तन्त्रांशस्य अपराधै: संवलितस्य प्रतिवेदनस्य अन्तर्गतं कृतम्। अयम् अनुप्रयोग: आपराधिक-गतिविधीन् संवर्धयति इति।

**केन्द्रीयमंत्री डा. जितेन्द्रसिङ्घ:**

केन्द्रीयमंत्री डा. जितेन्द्रसिंह: नवदेहली-नगरे अमेरिका-भारत-नागरिक-परमाणु-वाणिज्य-विषये द्वैपाक्षिक-सम्मेलनस्य अध्यक्षताम् निभालितवान् । विज्ञान-प्रौद्योगिकी-मन्त्रालयः अद्य अवदत् यत् अस्यां सभायां विज्ञानं, प्रौद्योगिकी, स्वच्छ-ऊर्जा इत्यादिषु महत्त्वपूर्णक्षेत्रेषु उभयो राष्ट्रयोः मध्ये प्रगाढः सहकारः प्रकाश्यते इति। सभायां

डा. सिंह: अघोषयत् यत् गगनयान-अभियान-संस्थायाः एकः भारतीयः अन्तरिक्षयात्री अन्ताराष्ट्रिय-अन्तरिक्ष-केन्द्रे भागं ग्रहीतुं सज्जः अस्ति, अथ च भारत-अमेरिका-अन्तरिक्ष-सहयोगस्य महत्त्वपूर्णं सोपानम् अस्ति इति।

## एकीकृत-पेंशन-योजना

ऑल इण्डिया रेलवेमेंस फेडरेशन इत्यनेन केन्द्र-सर्वकारस्य एकीकृत-पेंशन-योजनायाः स्वागतं कृतम्। अखिलभारतीय-रेलगण-सङ्घस्य महासचिवः शिव-गोपाल-मिश्रा अद्य नवदिल्ल्याम् अवोचत् यत् नूतन-सेवा-निवृत्ति-वृत्ति-योजनायां कर्मचारिणां सम्मर्शान् अनुरोधान् च निध्याय योजना निर्मिता अस्ति। एतदर्थं तेन कर्मचारिणां पक्षत: प्रधानमन्त्रिणं प्रति आभारः प्रकटितः।

## चिराग-पासवानः

केन्द्रीय-मन्त्री चिराग-पासवानः अद्य लोक-जनशक्ति-पार्टी इत्यस्य अध्यक्षः निर्वाचितः। असौ आगामि-पञ्चवर्षेभ्यः दलाध्यक्षः चितः। रांची नगरे एल.जे.पीति-दलस्य राष्ट्रीय-कार्य-कारिण्योपवेशने सर्वसम्मत्या अयं निर्णयः स्वीकृतः। अत्रान्तरे चिराग-पासवानः अवोचत् यत् उपवेशने हरियाणा-जम्मू-कश्मीर-झारखण्ड-विधान-सभा-निर्वाचन-विषये अपि चर्चा अभवत्। अमुनोक्तं यत् झारखण्डे लोक-जनशक्ति-पार्टीति-दलं निजसहयोगिना भाजपा-दलेन सह एकाकि एव निर्वाचने प्रतिभागं करिष्यति।

## बैडमिण्टन्-क्रीडा

बैडमिण्टन्-क्रीडायां भारतस्य तन्वी पात्री इत्येषा अद्य चीनदेशस्य चेङ्ग्डू-नगरे एशिया-सप्तदशवर्षीय - पञ्च दश वर्षीययो: कनिष्ठ-च्याम्पियन्शिप्-क्रीडासु पंचदश-वर्षीय अभ्यांतरे एकल-बालिका इति उपाधिम् अवाप्नोत्। तन्वी अन्तिम-स्पर्धायां वियतनाम-देशस्य द्वितीयश्रेण्याः क्रीडिकां द्वाविंशति-विंशति: एक विंशति - एकादश इति अङ्कैः पराजितवती। त्रयोदश वर्षीया बैडमिंटन-क्रीडीका एकामपि क्रीडां न पतित्वा उपाधिम् अवाप्नोत्। पूर्वं उपान्त्य-चक्रकस्य क्रीडायां तन्वी, थाईलैंड-देशस्य क्रीडिकां पराजितवती।

**॥ इति वार्ता: ॥**